अथ वर्षासु पथ्यम्।

लवणम्। अम्लम्। मिष्टम्। सारम्। प्रियम्। स्निग्धम्। गुरु। उष्णम्। बल्यम्। अभ्यङ्गः। उद्वर्त्तनम्। अग्निसेवा। तप्ताम्बुपानम्। दधि॥

वर्षास्वपथ्यम्।

पूर्व्वपवनः। वृष्टिः। घर्म्मः। हिमः। श्रमः। नदीनीरम्। दिवास्वप्नः। रूक्षम्। नित्यमैथुनम्॥ * ॥

शरदि पथ्यम्।

शीतरसाम्बुपानम्। तरुच्छाया। चन्दनम्। इन्दुसेवा। सिता। मुद्गः। मधुरम्। गव्यदुग्धम्। इक्षुः। शाल्योदनम्॥ * ॥

शरद्यपथ्यम्।

लवणम्। अम्लम्। तीक्ष्णम्। कटु। पिष्टम्। अतसी। विदाहि। सुरा। नालम्। दधि। तक्रम्। तैलम्। क्रोधः। उपवासः। आतपः। मैथुनम्॥ * ॥

अथ हिमर्त्तौ पथ्यम्।

तप्तजलम्। उपनाहः। पयः। अन्नम्। पानम्। घृतम्। स्त्रीसेवा। वह्निसेवा। गुरूणि। यथेष्टभुक्तम्॥ * ॥

हिमर्त्तावपथ्यम्।

दिवानिद्रा। रूक्षभोजनम्। अभोजनम्। लङ्घनम्। पुरातनान्नम्। लघुपाकि। शैत्यम्। वातोदनम्। शीतजलावगाहः॥ * ॥

शिशिरे पथ्यम्।

स्त्री। वह्निसेवा। मत्स्यः। जाङ्गलमांसम्। दधि। दुग्धम्। सर्पिः॥ * ॥

शिशिरेऽपथ्यम्।

तीक्ष्णोष्णकट्वम्लकषायतिक्तानि। सासुद्रकम्। आर्द्रभोजनम्। दिवानिद्रा। चन्दनम्। चन्द्रसेवा। शीतजलस्नानादि॥ * ॥

माघे विशेषो यथा।

माघे च शीतद्रवमिष्टपिष्टं
कन्दः कदल्या गुरुशालिभक्तम्।

इति षड़ृतुपथ्यापथ्याधिकारः॥ * ॥

आगन्तुकज्वराणां पथ्यापथ्यं ज्वराधिकारे
न लिखितमतोऽत्र लिख्यते।

"अभिघातसमुत्थाने पानाभ्यङ्गौ च सर्पिषः।
घातजे व्रणजे चापि क्षतव्रणचिकित्सितम्॥
ओषधीगन्धविषजे विषपित्तप्रसाधनम्।
अभिचाराभिशापोत्थे जपहोमादिभेषजम्॥
उत्पातग्रहपीड़ोत्थे दानस्वस्त्ययनादयः।
क्रोधोत्थिते पित्तहरं कामजे कामजित्क्रिया॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया।
आश्वासनेष्टलाभौ हर्षदायीनि यानि च॥
विशेषतः पुनश्चात्र कामक्रोधसमुत्थिते।
भयशोकसमुद्भूते कामक्रोधोक्तमौषधम्॥
भूताभिषङ्गजे भूतबन्धावेशनताड़नम्।
मनःक्षोभसमुत्पन्ने मनसः सान्त्वनानि च॥
इत्यागन्तुज्वरे पूर्व्वैर्भिषग्भिः पथ्यमिष्यते।
विष्णोर्नामसहस्रस्य पाठनं श्रवणं श्रुतेः॥
देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम्।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः॥
साधूनां दर्शनं सत्यं रत्नौषधिविधारणम्।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत्॥"

आगन्तुकज्वरे अपथ्यम्।

"अधिवासनकर्म्माणि रक्तस्रग्वस्त्रधारणम्।
वमिवेगं दन्तकाष्ठमसात्म्यमपि भोजनम्॥
विरुद्धान्यन्नपानानि विदाहीनि गुरूणि च।
दुष्टाम्बुक्षारमद्यानि पत्रशाकं विरूढ़कम्॥
नलदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम्।
आड़ीमत्स्यञ्च पिण्याकं कृशाकं पिष्टवैकृतम्॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्ज्जयेत्॥"

इति पथ्यापथ्यविनिश्चयः समाप्तः॥

पद, स्थैर्य्ये। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) पदति। इति दुर्गादासः॥

पद, त् क ङ गतौ। इति कविकल्पद्रुमः॥ (अदन्त-चुरां-आत्मं-सकं-सेट्।) क ङ, पदयते। इति दुर्गादासः॥

पद, य ङ औ गत्याम्। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) य ङ, पद्यते। औ, पत्ता। इति दुर्गादासः॥

पदं, क्ली, (पद+'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।' ३। १। १३४। इति अच्।) व्यवसायः। त्राणम्। स्थानम्। (यथा, मनुः। १२। १२५।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम्॥")
चिह्नम्। पादः। वस्तु। इत्यमरः। ३। ३। ९३॥ शब्दः। वाक्यम्। प्रदेशः। पादचिह्नम्। श्लोकपादः। (यथा, रामायणे। १। २। १८।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा॥")
किरणे पुं। इति मेदिनी॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।"
इति साहित्यदर्पणे। २। ४॥

श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णीं राजतीं वापि पाषाणनिर्म्मितामपि।
पादयोश्चाङ्कितां कृत्वा पूजाञ्चैव समाचरेत्॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्यजः।
तच्च नम्रजनस्योग्रसंसारच्छेदनाय सः॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः।
ध्यातृचित्तद्विरेफाणां लोभमायाति शोभनम्॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम्।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम्॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारणम्।
भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्व्वणि।
तथा वामाङ्गुष्ठमूले पाञ्चजन्यस्य लक्षणम्।
सर्व्वविद्याप्रकाशाय धत्ते च भगवानजः॥"
इति पाद्मे पातालखण्डे १२ अध्यायः॥

पदकः, पुं, पदं वेत्ति यः ("क्रमादिभ्यो वुन्।" ४।२। ६१। इति वुन्।) पदज्ञाता। इति व्याकरणम्॥ (यथा, राजतरङ्गिण्याम्। ५। ४६।
"रामनाथमुपाध्यायं ख्यातव्याकरणश्रमम्।
व्याख्यातपदकश्चक्रे स तस्मिन् सुरमन्दिरे॥")
स्वनामख्यातकण्ठभूषणञ्च। देवपदचिह्नादियुक्तत्वात्॥ (पदमेव इति स्वार्थे के कृते, क्ली। पदम्। यथा, महाभारते अनुशासनपर्व्वणि।
"इतःप्रभृति यातव्यं पदकं पदकं शनैः॥")

पदगः, पुं, (पदाभ्यां गच्छतीति। गम लृगतौ+"अन्येभ्योऽपि।" इति डः।) पदातिकः। इत्यमरः। २। ८। ६६॥ पद्भ्यां गमनकर्त्तरि त्रि॥

पदन्यासः, पुं, (पदस्य गोपदस्येव न्यासो यत्र।) गोक्षुरः। इति शब्दचन्द्रिका॥ पदस्य विन्यासः। यथा, रसमञ्जरी।
"पदन्यासो गेहाद्बहिरहिफणारोहणसमः
स्वगेहादन्यत् स्यान्नयनमपरद्वीपतुलितम्।
वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः॥"
(तन्त्रोक्तान्नपूर्णामन्त्रस्यपदानां तत्तदङ्गेषु न्यासः। यदुक्तं तन्त्रसारश्यामार्णवे।
"एकमेकं पुनश्चैकं पुनरेकं द्वयन्ततः।
चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्व्वति!॥
पदान्येतानि देवेशि! नवद्वारेषु विन्यसेत्।
मस्तकादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने!॥
गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत्॥")

पदभञ्जनं, क्ली, (विभक्तियुक्तानां पदानां भञ्जनं विश्लेषो यत्र। यद्वा, पदानि भज्यन्तेऽनेन। भञ्ज+करणे ल्युट्।) निरुक्तम्। गूढ़ार्थशब्दव्याख्या। इति हेमचन्द्रः॥

पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका।) पञ्जिका। टिप्पनी। इति हेमचन्द्रः॥

पदमाला, स्त्री, (पदानां माला विस्तृतिर्यस्याम्।) मोहनशीला विद्या। यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम्।
याचयामि सुरेशानसुमादेहाहं धारिणम्॥"
इति देवीपुराणे ६ अध्यायः॥
अस्या विवरणं तत्रैव द्रष्टव्यम्। पदश्रेणी च॥

पदविः, स्त्री, (पद्यते गम्यतेऽनया। पद गतौ+"पद्यटिभ्यामविः।" इति अविः।) पद्धतिः। पन्थाः। इत्यमरः। २। १। १५॥

पदवी, स्त्री, (पदवि+"कृदिकारादक्तिनः।" इति पक्षे ङीष्।) पन्थाः। इत्यमरः। २।१।१५॥ (यथा, रघुः। ७। ७।
"उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान॥"
पद्धतिः। यथा, तत्रैव। ३। ५०।
"अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः॥"
पदम्। यथा, पञ्चतन्त्रे। १। २५८। "अथ तेन सिंहाय अमात्यपदवी प्रदत्ता याभाय शय्यापालत्वमिति॥")

पदष्ठीवं, क्ली, (पादौ च अष्ठीवन्तौ च तयोः समाहारः। "अचतुरविचतुरेति।" ५।४।७७। इति